# M.A. 4th Semester Examination, 2021
# SANSKRIT
## Course ID: 40953
## Course Code: SNSK 403EB
## Course Title: (Ādhunik Kāvya)

**Full Marks: 40** **Time: 2 Hour**

**The figures in the margin indicate full marks**

## Unit-I

(आधुनिकसंस्कृतसाहित्ये प्रश्नाः)

**1. अधोलिखितेषु एकः प्रश्नः समाधेयः ।** **10X1 =10**

(अ) पञ्चाननतर्करत्नमहाभागानां काव्यग्रन्थान् आश्रित्य कश्चन निबन्धो लेख्यः।

(आ) रेवाप्रसादद्विवेदिनां महाकाव्यमाश्रित्य कश्चन निबन्धो लेख्यः।

(इ) हरिदाससिद्धान्तवागीशानामाधुनिककाव्यान्याश्रित्य कश्चन निबन्धो लेख्यः।

**2. अधोलिखितेषु प्रश्नेषु पञ्चप्रश्नानाम् उत्तराणि लेख्यानि ।** **2X5 =10**

(अ) सीतानाथाचार्याणां काव्यग्रन्थद्वयस्य नाम लेख्यम्।

(आ) श्रीजीवन्यायतीर्थानां प्रहसनद्वयस्य नाम लेख्यम्।

(इ) कालीपदतर्काचार्याणां महाकाव्यद्वयस्य नाम लेख्यम्।

(ई) हरिदत्तशर्मणां काव्यद्वयस्य नाम लेख्यम्।

(उ) अभिराजराजेन्द्रमिश्राणां शृङ्गाररसात्मकस्य लघुकाव्यद्वयस्य नाम लेख्यम्।

(ऊ) इतिहासाश्रितस्याधुनिककाव्यद्वयस्य नाम लेख्यम्।

(ऋ) सिद्धेश्वरचट्टोपाध्यायमहाभागानां रूपकद्वयस्य नाम लेख्यम्।

## Unit –II

(विश्रुतचरिते प्रश्नाः)

**3. निम्नलिखितेषु प्रश्नेषु गद्यद्वयं व्याख्यायताम् ।** **5X2=10**

(अ) महाभाग ! क्लिष्टस्य मे क्रियतामार्य, साहाय्यकम् । अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निहकूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः । तमलमस्मि नाहमुद्धर्तुम् इति । अथाहमभ्येत्य व्रतत्या कयाऽपि वृद्धमुत्तार्य, तं च वालं वंशनालीमुखोद्धताभिरद्भः फलैश्च पञ्चषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य, तरुतलनिषन्नस्तम् ।

(आ) देव दैवानुग्रहेण यदि कश्चिद्राजनं भवति विभूतेः , तमकस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्ताः । तथाहि केचित्प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य, मुण्डयित्वा शिरः बद्ध्वा दर्भरज्जुभिः, अजिनेनाच्छाद्य, नवनीतेनोपलिप्य, अनशनं च शायित्वा, सर्वस्वं स्वीकरिष्यन्ति ।

(इ) अहो मे मोहाद्बालिश्यम् । अरुचितेऽर्थे चोदयन्नर्थीवाक्षिगतोऽहमस्य हास्यो जातः । स्पृष्टमस्य चेष्टानामायार्थपूर्व्यम् । तथा हि, न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते, नोत्सवेष्वनुगृह्णाति, न विलोभनमस्तु प्रेषयति, न मत्पक्षान्प्रत्यवेक्षते न मामसन्नवरर्येष्वभ्यन्तरीकरोति, न मामन्तःपुरं प्रवेशयति ।

(ई) किमीया जात्यास्य माता इत्यनुयुक्ते मयामुनोक्तम्- पाटलीपुत्रस्य वणिजो वैश्रवणस्य दुहितरि सागरवत्तायां कोसलेन्द्रात्कुसुमधन्वनोऽस्य माता जाता इति । यद्येवमेतन्मातुर्मेत्पितुश्चैको मातामहः इति सस्नेहं सस्वजे ।

**4. अधोनिर्दिष्टेषु <u>द्वयोः</u> भावार्थो लेख्यः ।** **5X2 =10**

(अ) चित्तज्ञानानुवर्तिनोऽनर्था अपि प्रियाः स्युः ।

(आ) वाक्पारुष्यं दण्डो दारुणो दूषणानि चार्थानामेव यथावकाशमौपकारिकाणि ।

(इ) अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम् ।